# শঙ্করাষ্টকম্

{॥ শঙ্করাষ্টকম্ ॥}

শ্রীগণেশায় নমঃ ।

শীর্ষজটাগণভারং গরলাহারং সমস্তসংহারম্ ।

কৈলাসাদ্রিবিহারং পারং ভববারিধেরহং বন্দে ॥ ১॥

চন্দ্রকলোজ্জ্বলভালং কণ্ঠব্যালং জগত্ত্রয়ীপালম্ ।

কৃতনরমস্তকমালং কালং কালস্য কোমলং বন্দে ॥ ২॥

কোপেক্ষণহতকামং স্বাত্মারামং নগেন্দ্রজাবামম্ ।

সংসৃতিশোকবিরামং শ্যামং কণ্ঠেন কারণং বন্দে ॥ ৩॥

কটিতটবিলসিতনাগং খণ্ডিতযাগং মহাদ্ভুতত্যাগম্ ।

বিগতবিষযরসরাগং ভাগং যজ্ঞেষু বিভ্রতং বন্দে ॥ ৪॥

ত্রিপুরাদিকদনুজান্তং গিরিজাকান্তং সদৈব সংশান্তম্ ।

লীলাবিজিতকৃতান্তং ভান্তং স্বান্তেষু দেহিনাং বন্দে ॥ ৫॥

সুরসরিদাপ্লুতকেশং ত্রিদশকুলেশং হৃদালযাবেশম্ ।

বিগতাশেষক্লেশং দেশং সর্বেষ্টসম্পদাং বন্দে ॥ ৬॥

Stotram Digitalized By Sanskritdocuments.org

করতলকলিতপিনাকং বিগতজরাকং সুকর্মণাং পাকম্ ।

পরপদবীতবরাকং নাকঙ্গমপূগবন্দিতং বন্দে ॥ ৭॥

ভূতিবিভূষিতকাযং দুস্তরমাযং বিবর্জিতাপাযম্ ।

প্রমথসমূহসহাযং সাযং প্রাতর্নিরন্তরং বন্দে ॥ ৮॥

যস্তুপদাষ্টকমেতদ্ব্রহ্মানন্দেন নির্মিতং নিত্যম্ ।

পঠতি সমাহিতচেতাঃ প্রাপ্নোত্যন্তে স শৈবমেব পদম্ ॥ ৯॥

ইতি শ্রীমৎপরমহংসস্বামিব্রহ্মানন্দবিরচিতং শ্রীশঙ্করাষ্টকং সম্পূর্ণম্ ।

Encoded and proofread by Kaushal S. Kaloo kaushalskaloo at gmail.com

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Shankarashtakam Lyrics in Bengali PDF
% File name : shankarAShTakam.itx
% Category : aShTaka
% Location : doc_shiva
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : Kaushal S. Kaloo kaushalskaloo at gmail.com
% Proofread by : Kaushal S. Kaloo kaushalskaloo at gmail.com
% Description-comments : Swami Brhmanananda
% Latest update : April 17, 2013
% Send corrections to : Sanskrit@cheerful.com

% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 12, 2015 ] at Stotram Website